



# नवीन(आधुनिक)पद्धत्या वेदाध्ययनप्रस्तुतिः
# Innovative Vedic Learning (IVL)

**प्रस्तोता - वेदवारिधिः प. रामानुजाचार्यः**

स्थापकन्यासी, पराङ्कुशाचार्य वैदिक अध्ययन संस्था, बेंगलूरु

निदेशकचरः, भारतसर्वकारस्य प्रगतसंगणनविकासकेन्द्रम्, बेंगलूरु,

२२-१-२०२४तः अन्तर्जालमाध्यमेन





pivstrust.org : pivstrust@gmail.com

# किम् आधुनिकं, नवीनं वा?

कालानुगुणं वेदशास्त्राणाम् अध्ययन-अध्यापन-परम्परा-संरक्षणार्थं प्रसार-कार्यक्रमाः अवश्यापेक्षिताः, देशकालवैगुण्यादिभिः धर्मानुष्ठाने अन्यथाभाव-सम्भवात् । तत्र धर्मविचिकित्सा, वृत्तविचिकित्सादिषु यथा ब्राह्मणैः, सम्मर्शिभिः, युक्तैः, आयुक्तैः, अलूक्षैः, धर्मकामैश्च चोद्यते, तथा अनुष्ठेयमिति तैत्तिरीयश्रुतिः आदिशति । अतः तादृशधर्मस्थेयभूतानाम् उत्पादनाय तत्तत्कालोचितमार्गाश्रयणम् अनिवार्यम्, अपेक्षितं च । अतः अयं प्रक्रमः अस्मत्संस्थया परिकल्पितः ॥

वेदानाम् अर्थज्ञान, मूलमातृकापठन-सम्पादन-कौशल, समसामयिक-लौकिकांशैः सह सन्तोल्य अविरोधेन धर्माचरणविषये अनुसन्धान, संशोधनादिषु पाटवाधानं च प्रशिक्षणद्वारा अत्र उद्देश्यम् ॥

वेदवारिधिः प. रामानुजाचार्यः





# सम्प्रति वेदाध्ययने समस्या VEDIC LEARNING CHALLENGE

यदधीतम् अविज्ञातं
निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधः
न तज्ज्वलति कर्हिचित् ॥

तत्त्वम् THEORY

अभ्यासः
PRACTICE

यस्तन्न वेद किमृचा
करिष्यति । य
इत्तद्विदुस्त इमे
समासते ॥

अर्थज्ञानप्राधान्यम्
Primacy to Meaning

आधुनिकोपयोगित्वम्
Contemporaneity

दैनन्दिनजीवने उपयोगः
Utility to daily lives

कण्ठस्थीकरणम्
Memorization


विकृति-पाठाः
Vikruti Paatha

पारायणम्
Parayanam

ज्ञानापेक्षया अभ्यासस्य मुख्यत्वम् इव दृश्यते
Stress on Practice seems to be more than theoretical aspects

# प्राचीनपद्धतिः

यथालोकं यथावेदं
लौकिके वैदिकेऽपि वा ।
यो वक्ता स परिग्राह्यः
प्राक्तनोऽद्यतनोऽपि वा ॥




अर्थज्ञान-धारणयोः
उभयोरपि समतोलनम्
वेदाध्ययने आवश्यकम्

वेदवारिधिः प. रामानुजाचार्यः





# प्रस्तूयमानपद्धतिः

भारतस्य विश्वगुरुत्वं स्थापयितुं विंशतिवर्षीययोजना आवश्यकी । एतच्च वैदिकैरेव स्वकर्तव्यनिर्वहणेन साध्यमस्ति । एतदर्थं वैदिकच्छात्राः, अध्यापकाः, शोधविद्वांसश्च वेदार्थावगतौ तद्वैभवे च क्षमतावर्धनेन प्रशिक्षणीयाः । वेदाध्यायिनां अध्यापकानाञ्च तेषां ज्ञानस्य उपयोगेन समाजे गौरवयुता वृत्तिः कल्पनीया । सर्वकारेण सहयोगः नूतन-शिक्षण-प्रणालीद्वारा पठ्यक्रमपद्धत्या भारतीयज्ञानपरम्परायाम् ईदृशकौशलवर्धने वैदिकानाम् उपकुर्यात् ॥

## उद्दिष्टपठ्यक्रमः

वेदस्य मूल(पद-क्रम)पर्यन्ताध्ययनं कृतवतां (मन्त्रपाठिनां) तदर्थावगतौ सौकर्याय त्रिषु स्तरेषु शिक्षणं कल्पितम् । 1. **लक्षणाध्ययनम्** - षण्मासाः, 2. **अङ्गाध्ययनम्** - 1 संवत्सरः, 3. **भाष्याध्ययनम्** - 2 संवत्सरौ । पठ्य-प्रशिक्षणक्रमः त्रिष्वपि स्तरेषु अग्रे प्रस्तूयते ।


सर्वेषां साधारणाः पठ्यांशाः -

1. **वेदपरिचयः**, 2. संस्कृतज्ञानम् (प्रारम्भस्तरसंस्कृतशिक्षणम्), **पाण्डुलिपिपठनम्** [कौशलम्] – प्रात्यक्षिकीमाध्यमेन) 3. **वेदानां संरचनात्मकम् अध्ययनम्** [उपकरणानि] 4. **वेदभाष्याणि, तेषां प्रमेयविषयाश्च** [तत्त्वानि] 5. **प्रायोगिकसंशोधनम्, अनुसन्धानश्च** [विज्ञानं, वेदश्च] 6. **अभ्यासाः, प्रकल्पाः, करकौशलादि** [प्रवृत्तिः] । एते प्रत्येकम् अग्रे विव्रियन्ते ।

द्र०-parankusan.cloudapp.net/integrated/new_website_pivs/E-Learning/IVL Course/IVL_Course_SanskritPage.html


वेदवारिधिः प. रामानुजाचार्यः

# वेदपरिचयः - वेदशाखाः



वेदशाखाः (११३१)
ऋग्वेदः (२१)
यजुर्वेदः (१०१)
सामवेदः (१०००)
अथर्वणवेदः (९)
शाकल
बाष्कल
आश्वलायन
शुक्लः (१५)
कृष्णः (८६)
काण्व
माध्यन्दिन
तैत्तिरीय
मैत्रायणी
काठक
कपिष्ठल
कौथुम
जैमिनीय
राणायनीय
शौनक
पैप्पलाद

# पाण्डुलिपिपठनम् - ऋग्वेदक्रमदीपिका




वा शंसं पूषणं ॥ चित्कंभनेन स्कभीयान् ॥ इत्येतेषां मध्यपदान्यवसानीया
नि ॥ नेतार ऊषुणः ॥ अस्या ऊषुणः ॥ त ऊषुणः ॥ निरु स्वसारमस्कृतोषसमि
ति रात्र्यां पंचक्रमः ॥ अगादारैगु कृष्णा ॥ ईयते नरा च शंसं दैव्यं ॥ तं म्वास्था
पर्यंति ॥ एते चतुःक्रमाः ॥ न्यावित्प्रभृतीनां च पदानां विकृतिस्तु या ॥ अन
न्यकारिता तस्मात्तेषां त्रिक्रमता स्मृताः ॥ न्याविध्यदिलीबिशस्य ॥ अवि
ध्यदित्यविध्यत् ॥ इलीबिशस्य दृह्ला ॥ इत्यादीनां पदकृत्यं तदन्यपदान्य
ज्ञातं न भवति ॥ निषसादेत्यत्र सकारस्य षकारस्य सत्वं ॥ निकाराज्ज्ञातं ।
गोराहेणेत्यत्र णकारस्य णत्वं रेफाज्ज्ञातं ॥ इत्यादीनां विकृतिरन्यकारिता ॥
अतस्त्वेतेषां त्रिक्रमता नास्ति ॥ निषसाद । ससाद धृतव्रतः । गोरोहेण ।

उदाहृतोदाहरणस्थलानि


1) 10.111.5,
2) 10.126.6,
3) 1.138.4,
4) 10.61.27,
5) 10.127.3,
6) 1.113.2,
7) 9.86.42,
8) 10.102.10,
9) 1.33.12,
10) 1.25.10,
11) 1.180.5


# पाण्डुलिपिपठनम् - अष्टाध्यायी



ञो भवनात् । द्विगोर्लुगनपत्ये । गोत्रेऽलुगचि । यूनि लुक् । फक्फिञोरन्यतरस्याम् । तस्या
पत्यम् । एको गोत्रे । गोत्राद्यून्यस्त्रियाम् । अत इञ् । बाह्वादिभ्यश्च । सुधातुरकङ् च । गोत्रे
कुञ्जादिभ्यश्च्फञ् । नडादिभ्यः फक् । हरितादिभ्योऽञः ॥५॥ ..॥ यञञोश्च । शरद्वच्छुनकदर्भा
द्भृगुवत्साग्रायणेषु । द्रोणपर्वतजीवन्तादन्यतरस्याम् । अनृष्यानन्तर्ये बिदादिभ्योऽ
ञ् । गर्गादिभ्यो यञ् । मधुबभ्र्वोर्ब्राह्मणकौशिकयोः । कपिबोधादाङ्गिरसे । वतण्डाच्च ।
लुक् स्त्रियाम् । अश्वादिभ्यः फञ् । भर्गात् त्रैगर्ते । शिवादिभ्योऽण् । अवृद्धाभ्यो नदीमानुषी
भ्यस्तन्नामिकाभ्यः । ऋष्यन्धकवृष्णिकुरुभ्यश्च । मातुरुत्संख्यासंभद्रपूर्वायाः । कन्यायाः कनी
न च । विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु । पीलाया वा । ढक्च मण्डूकात् । स्त्रीभ्यो ढक् ।
॥६॥ ..॥ द्व्यचः । इतश्चानिञः । शुभ्रादिभ्यश्च । विकर्णकुषीतकात् काश्यपे ।

# वेदानां संरचनात्मकम् अध्ययनम्





काठकचयनेषु सावित्रचयनम्

# जयादिषु राष्ट्रभृन्मन्त्राः

ऋ॒ता॒षाडृ॒तधा॑मा॒ऽग्निर्ग॑न्ध॒र्वस्तस्यौष॑धयोऽप्स॒रस॒ ऊर्जो॒ नाम॒ स इ॒दम्ब्रह्म॑ ख्ष॒त्रम्पा॑तु॒ ता इ॒दम्ब्रह्म॑ ख्ष॒त्रम्पा॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्य॒स्स्वाहा॑ स॒ꣳहि॒तो वि॒श्वसा॑मा॒ सूर्यो॑ गन्ध॒र्वस्तस्य॒ मरी॑चयोऽप्स॒रस॑ आ॒युव॑स्सुषु॒म्नस्सूर्य॑रश्मि-श्च॒न्द्रमा॑ गन्ध॒र्वस्तस्य॒ नक्ष॑त्राण्यप्स॒रसो॑ बे॒कुर॑यो भु॒ज्युस्सु॑प॒र्णो य॒ज्ञो ग॑न्ध॒र्वस्तस्य॒ दक्षि॑णा अप्स॒रस॑स्स्त॒वाः प्र॒जाप॑तिर्वि॒श्वक॑र्मा॒ मनो॑ ग॑न्ध॒र्वस्तस्य॑र्ख्सा॒मान्य॑प्स॒रसो॒ वह्न॑य इ॒षि॒रो वि॒श्वव्य॑चा॒ वातो॑ गन्ध॒र्वस्तस्यापो॑ऽप्स॒रसो॑ मु॒दा भुव॑नस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑ । स नो॑ रा॒स्वाज्या॑निꣳ रा॒यस्पोष॑ꣳ सु॒वीर्य॑ꣳ स॒ँव्वथ्स॒रीणा॑ꣳ स्व॒स्तिम् । प॒र॒मे॒ष्ठ्यधि॑पतिर्मृ॒त्युर्ग॑न्ध॒र्वस्तस्य॒ विश्व॑मप्स॒रसो॒ भुव॑स्सुक्षि॒तिस्सुभू॑तिर्भद्र॒कृथ्सुव॑र्वान्प॒र्जन्यो॑ गन्ध॒र्वस्तस्य॑ वि॒द्युतो॑ऽप्स॒रसो॒ रुचो॑ दू॒रेहे॑तिरमृड॒यो मृ॒त्युर्ग॑न्ध॒र्वस्तस्य॑ प्र॒जा अ॑प्स॒रसो॑ भी॒रुव॒श्चारु॑ः कृ॒प॒ण॒का॒शी कामो॑ गन्ध॒र्वस्तस्या॒धयो॑ऽप्स॒रस॑श्शो॒चय॑न्ती॒र्नाम॒ स इ॒दम्ब्रह्म॑ ख्ष॒त्रम्पा॑तु॒ ता इ॒दम्ब्रह्म॑ ख्ष॒त्रम्पा॑न्तु॒ तस्मै॒ स्वाहा॒ ताभ्य॒स्स्वाहा (तै.सं. 3.4.8)

| गन्धर्वस्य विशेषणम् | गन्धर्वः | अप्सरसः | अप्सरसां नाम |
|---|---|---|---|
| ऋ॒ता॒षाट्, ऋ॒तधा॑मा | अ॒ग्निः | ओष॑धयः | ऊर्जः॑ |
| स॒ꣳहि॒तः, वि॒श्वसा॑मा | सू॑र्यः | मरी॑चयः | आ॒युवः॑ |
| सु॒षु॒म्नः, सूर्य॑रश्मिः | च॒न्द्रमाः | नक्ष॑त्राणि | बे॒कुर॑यः |
| भु॒ज्युः, सु॒प॒र्णः | य॒ज्ञः | दक्षि॑णाः | स्त॒वाः |
| प्र॒जाप॑तिः, वि॒श्वक॑र्मा | मनः॑ | ऋ॒ख्सा॒मानि॑ | वह्न॑यः |
| इ॒षि॒रः, वि॒श्वव्य॑चाः | वातः॑ | आपः॑ | मु॒दाः |
| प॒र॒मे॒ष्ठी, अधि॑पतिः | मृ॒त्युः | विश्व॑म् | भुवः॑ |
| सु॒क्षि॒तिः, सु॒भू॑तिः, भ॒द्र॒कृत्, सु॒व॑र्वान् | प॒र्जन्यः॑ | वि॒द्युतः॑ | रुचः॑ |
| दू॒रेहे॑तिः, अ॒मृ॒ड॒यः | मृ॒त्युः | प्र॒जाः | भी॒रुवः॑ |
| चारुः॑, कृ॒प॒ण॒का॒शी | कामः॑ | आ॒धयः॑ | शो॒चय॑न्तीः |

# पञ्चसारवर्णक्रमविवरणम्





ध्वनिः स्थानं च करणं प्रयत्नो देवता ततः ।
जातिरङ्गं वर्णसंज्ञा व्यञ्जनानां विधीयते ॥
अचामेवं प्रोच्यमाने ध्वन्यादींश्च यथाक्रमम् ।
प्रयत्नदेवयोर्मध्ये मात्राकालः प्रकीर्तितः ॥
उदात्तादिस्वराणां तु ध्वन्यादीन्परिवर्जयेत् ।
तथाऽपि देवताजातिगुणरेखानिदर्शनम् ॥
अध्येत्रङ्गाद्यवस्थां च षड्जादिस्वरकारणम् ।
सोत्पत्तिस्थानकं चैव स्वसंज्ञां चानुपूर्वशः ॥

यान्त्रिकरूपेण शुद्ध-स्वर-मात्रा-अङ्ग-वर्णसारभूत-वर्णक्रमान् पञ्चापि ज्ञातुं सौकर्यं विद्यते ।

वेदवारिधिः प. रामानुजाचार्यः

# श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात् । (मी.सू. 3.3.14)




वेदवारिधिः प. रामानुजाचार्यः

## 1.12.4.2 उ॒श॒तः


वशँ कान्तौ


| | |
|---|---|
| वश्+अँ | उपदेशेऽजनुनासिक इत्, तस्य लोपः 1.3.2,9 |
| वश्+लँट् | वर्तमाने लट् 3.2.123 |
| वश्+ल्+अट् | उपदेशेऽजनुनासिक इत्, हलन्त्यम्, तस्य लोपः 1.3.2,3,9 |
| वश्+शतृँ | लटः शतृशानचावप्रथमासमानाधिकरणे 3.2.124 |
| वश्+शप्+शतृँ | कर्तरि शप् 3.1.68 |
| वश्+शप्+शतृँ | अदिप्रभृतिभ्यः शपः 2.4.72 |
| वश्+श्+अत्+ऋँ | उपदेशेऽजनुनासिक इत्, लशक्वतद्धिते, तस्य लोपः 1.3.2,8,9 |
| उ+अश्+अत् | ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च 6.1.16 |
| उश्+अत् | सम्प्रसारणाच्च 6.1.108 |
| उशत् | कृत्तद्धितसमासाश्च 1.2.46 |
| उशत्+शस् | स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् 4.1.2 |
| उशत्+श॒स् | अनुदात्तौ सुप्पितौ 3.1.4 |
| उशत्+श्+अ॒स् | लशक्वतद्धिते, तस्य लोपः 1.3.8,9 |
| उशत्+अ॒स् | न विभक्तौ तुस्माः 1.3.4 |
| उशत॒रुँ | ससजुषोरुः 8.2.66 |
| उशत॒र्+उँ | उपदेशेऽजनुनासिक इत्, तस्य लोपः 1.3.2,9 |
| उशत॒ः | खरवसानयोर्विसर्जनीयः 8.3.15 |
| उशतः | शतुरनुमो नद्यजादी 6.1.173 |
| उ॒श॒तः | अनुदात्तं पदमेकवर्जम् 6.1.158 |

# 1.12.4.7 यासिं

| | |
|---|---|
| या प्रापणे | |
| या | भूवादयो धातवः 1.3.1 |
| या | धातोः 6.1.162 |
| या | लः कर्मणि च भावे चाकर्मकेभ्यः 3.4.69 |
| या+लँट् | वर्तमाने लट् 3.2.123 |
| या+ल्+अँट् | उपदेशेऽजनुनासिक इत्, हलन्त्यम्, तस्य लोपः 1.3.2,3,9 |
| या+सिप् | तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् 3.4.78 |
| या+सिप् | लः परस्मैपदम् 1.4.99 |
| या+सिप् | तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः 1.4.101 |
| या+सिप् | तान्येकवचनद्विवचनबहुवचनान्येकशः 1.4.102 |
| या+सिप् | युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः 1.4.105 |
| या+सि॒प् | अनुदात्तौ सुप्पितौ 3.1.4 |
| या+सि॒प् | तिङ्शित्सार्वधातुकम् 3.4.113 |
| या+शप्+सि॒प् | कर्तरि शप् 3.1.68 |
| या+शप्+सि॒प् | अदिप्रभृतिभ्यः शपः 2.4.72 |
| यासि॒+प् | हलन्त्यम्, तस्य लोपः 1.3.3,9 |
| या॒सि॒ | तिङ्ङतिङः 8.1.28 |
| यासि | यद्वृत्तान्नित्यम् 8.1.66 |
| यासि॒ | अनुदात्तं पदमेकवर्जम् 6.1.158 |
| यासिं | उदात्तादनुदात्तस्य स्वरितः 8.4.66 |

# स्वरविमर्शः - रैखिकचित्रनिरूपणम्




1.11.8 (110)
इन्द्रमीशानमोजसाभि स्तोमा अनूषत । सहस्रं यस्य रातयं उत वा सन्ति भूयंसीः ॥ ८ ॥
इन्द्रम् । ईशानम् । ओजसा । अभि । स्तोमाः । अनूषत । सहस्रम् । यस्य । रातयः । उत । वा । सन्ति । भूयंसीः ॥ ८ ॥
यद्वृत्तम्
1.15.2 (148) मरुतः पिबंत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥ २ ॥
मरुतः । पिबत । ऋतुना । पोत्रात् । यज्ञम् । पुनीतन । यूयम् । हि । स्थ । सुऽदानवः ॥ २ ॥
हि-योगः
1.17.2 (169) गन्तारा हि स्थोऽवसे हवं विप्रस्य मावंतः । धर्तारा चर्षणीनाम् ॥ २ ॥
गन्तारा । हि । स्थः । अवसे । हवम् । विप्रस्य । माऽवतः । धर्तारा । चर्षणीनाम् ॥ २ ॥
हि-योगः
1.8.9 (79)
एवा हि ते विभूतय ऊतयं इन्द्र मावंते । सद्यश्चित्सन्ति दाशुषे ॥ ९ ॥
एव । हि । ते । विऽभूतयः । ऊतयः । इन्द्र । माऽवते । सद्यः । चित् । सन्ति । दाशुषे ॥ ९ ॥
हि-योगः
3
सन्ति
स्थः
सन्ति
स्थ
अस्+अन्ति
झोऽन्तः 7.1.3
सन्ति
श्नसोर... 6.4.111
सन्ति
तिङ्ङतिङः 8.1.28
सन्ति
हि च 8.1.34
सन्ति
अनुदा... 6.1.158
सन्ति
उदात्ता... 8.4.66
सन्ति
यद्वृत्ता... 8.1.66
सन्ति
अनुदा... 6.1.158
सन्ति
उदात्ता... 8.4.66
स्+थ
श्नसोर... 6.4.111
स्थ
तिङ्ङतिङः 8.1.28
स्थ
हि च 8.1.34
अस्+थस्
न विभ... 1.3.4
स्+थस्
श्नसोर... 6.4.111
स्थरुँ
ससजु... 8.2.66
स्थर्
उपदे.., तस्य... 1.3.2,9
स्थः
खरव... 8.3.15
स्थः
तिङ्ङतिङः 8.1.28
स्थः
हि च 8.1.34



श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः सामा॑नि॒ यजू॑ꣳषि । सा हि श्रीर॒मृतां॒ स॒ताम्॒ ।

# पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)



pivstrust.org ✉: pivstrust@gmail.com

## अनुसन्धान,संशोधनोपकरणम् – मानमेयरहस्यश्लोकवार्तिकम् – यान्त्रिकपद्धत्या प्रस्तुतिः

All Mail - ramanujachar@gmail. × | All Mail - pivstrust@gmail.com × | Tools × | मान-मेय-रहस्य-श्लोक-वार्तिकम् × | +

parankusan.cloudapp.net/Integrated/mm/index.html

सत्त्वविद्या

महामहोपाध्याय लक्षीपुरं श्रीनिवासाचार्येण विरचितं
मानमेयरहस्यश्लोकवार्तिकसकलशास्त्रसारसंग्रहरूपमाधारितः

मानमेयरहस्यश्लोकवार्तिकम्


१४. विशुद्धाद्वैतदर्शनं | १५. विशिष्टाद्वैतं | १६. द्वैतदर्शनं | १७. आर्हतदर्शनं | १८. शक्तिवादः | १९. शब्दशक्तिवादः | २०. सादृश्यवादः | २१. तमोवादः | २२. कालवादः | २३. आकाशवादः | २४. परमाणुवादः | २५. शरीरवादः | २६. इन्द्रियवादः | २७. लौकायतात्मा
२८. सौगतात्मा | २९. सांख्यात्मा | ३०. वैशेषिकात्मा | ३१. नैयायिकात्मा | ३२. मीमांसकात्मा | ३३. कौमारिलात्मा | ३४. प्राभाकरात्मा | ३५. बादरायणात्मा | ३६. वेदान्तात्मा | ३७. आर्हतात्मा | ३८. धर्मधर्मिभाववादः | ३९. द्रव्यवादः | ४०. गुणवादः | ४१. बुद्धिवादः
४२. प्राकट्यवादः | ४३. शब्दवादः | ४४. ध्वनिवादः | ४५. अदृष्टवादः | ४६. कर्मविभागवादः | ४७. हिंसावादः | ४८. अदृष्टसामर्थ्यम् | ४९. शास्त्रसामर्थ्यम् | ५०. कर्म(क्रिया)वादः | ५१. सामान्यवादः | ५२. असम्बन्धवादः | ५३. सम्बन्धवादः | ५४. अभाववादः
५५. प्रमाणपरीक्षा | ५६. प्रमाणस्वरूपम् | ५७. प्रमाणविभागः | ५८. स्वतस्त्वादिविचारः | ५९. प्रमाविचारः | ६०. भ्रमविचारः | ६१. अनिर्वचनीयवादः | ६२. संवृतिवादः | ६३. प्रत्यभिज्ञावादः | ६४. स्वयंप्रकाशवादः | ६५. स्मृतिवादः | ६६. प्रतिभावादः

### अदृष्टवादः

- तार्किकमतम्
- शाबरमतम्
- प्राभाकरमतम्
- कुमारिलमतम्
- सांख्यमतम्
- शाक्यमतम्
- आर्हतमतम्
- बादरायणमतम्
- वैदिकावैदिकविभागः
- अदृष्टेऽनुमानम्

अदृष्ट | तार्किकमत | शाबरमत | प्राभाकरमत | कुमारिलमत | सांख्यमत | शाक्यमत
आर्हतमत | बादरायणमत | वैदिकावैदिकमत | शास्त्रमत | यौक्तिकमत | बुधमत | सेश्वरमत

**Ontology of अदृष्ट**




**View of तार्किक s:**

श्लो. ४५.१.१ - ४५.१.५ :
धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् ।
गङ्गास्नानादियागादेः व्यापारस्स तु कीर्तितः [१] ॥
नाश्यस्त्वसौ कर्मनाशास्पर्शसंकीर्तनादिना ।
अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः ॥
प्रायश्चित्तादिना नाश्यः जीववृत्ती त्विमौ गुणौ ।
संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः [२] ॥
स्वगुणाः परमाणूनां विशेषाः पाकजा मताः ।
इमौ तु तत्त्वविज्ञानादपि क्वापि विनश्यतः ॥
अपूर्वं कर्मनिर्वर्त्यं वृद्धमीमांसका विदुः ।

---


विवरणम्

अदृष्ट is धर्म and अधर्म. धर्म is means of attaining स्वर्ग. व्यापार like गङ्गास्नान, याग etc. are perishable by enjoying (end of cause), touching, boasting etc. अधर्म, the cause of नरक etc. is caused by proscribed deeds and perishes by प्रायश्चित्त etc. धर्म and अधर्म are properties residing in जीव. संस्कार is only for पुमान्s, in acts like sprinkling, elemental properties of परमाणु s, distinctions by cooking/ripening etc. धर्म and अधर्म for some, are sometimes destroyed by तत्त्वविज्ञान . अपूर्व brought about by वैदिककर्म s is अदृष्ट according to ancient मीमांसक s.

Type here to search — 17°C Partly sunny — ENG IN — 07:42 17-01-2024


वेदवारिधिः प. रामानुजाचार्यः

# मानमेयरहस्यश्लोकवार्तिकतः अदृष्टवादः - 13. सेश्वरमते



# प्रायोगिकसंशोधनम्, अनुसन्धानञ्च


## सिद्धान्तानां पदार्थविभागः यान्त्रिकप्रणाल्या – मानमेयरहस्यश्लेकानुसारिक्रमेण - विशिष्टाद्वैतः




द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुर्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ । अन्त्यं प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदान्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥६॥ तत्र द्रव्यं दशावत्प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा । संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥७॥

## प्रायोगिकसंशोधनम्, अनुसन्धानञ्च


## मानमेयरहस्यश्लोकवार्तिकम् - अदृष्टवादः




वेदवारिधिः प. रामानुजाचार्यः



दे॒वा वै दे॑व॒यज॑नमध्यव॒साय॒ दिशो॒ न प्राजा॑न॒न्तेऽ३॒न्योन्यमुपा॑धाव॒न्त्वया॒ प्र जा॑नाम॒ त्वयेति॒ तेऽदि॑त्या॒ꣳ॒ सम॑ध्रियन्त॒ त्वया॒ प्र जा॑ना॒मेति॒ साब्र॑वीद्व॒रँ॑वृणै॒ मत्प्रा॑यणा ए॒व वो॑ य॒ज्ञा मदु॑दयना अस॒न्निति॒ तस्मा॑दादि॒त्यः प्रा॑य॒णीयो॑ य॒ज्ञाना॑मादि॒त्य उ॑दय॒नीयः॒ पञ्च॑ दे॒वता॑ यजति॒ पञ्च॒ दिशो॑ दि॒शाम्प्रज्ञात्यै अथो॒ पञ्चाख्षरा प॒ङ्क्तिः पाङ्क्तो॑ य॒ज्ञो य॒ज्ञमे॒वाव॑ रुन्द्धे॒ पथ्या॒ꣳ॒ स्व॒स्तिम॑यज॒न्प्राची॑मे॒व तया॒ दि॒शम्प्राजा॑नन् (तै.सं. 6.1.34)




## गार्हपत्यचयनार्थं पूर्वपश्चिमदिशोः (पृष्ठ्या) अवगतिः (बौ.श्रौ.सू.)

यत्पुण्य॒न्नख्ष॑त्रम् । तद्बट्कु॑र्वीतोपव्यु॒षम् । य॒दा वै सूर्य॑ उ॒देति॑ । अथ॒ नख्ष॑त्र॒न्नैति॑ । याव॑ति॒ तत्र॒ सूर्यो॒ गच्छेत् । यत्र॑ जघ॒न्य॑म्पश्येत् । ताव॑ति कुर्वीत यत्का॒री स्यात् । पु॒ण्या॒ह ए॒व कु॑रुते । ए॒वꣳ ह॒ वै य॒ज्ञेषु॑ञ्च श॒तद्यु॑म्नञ्च मा॒थ्स्यो निर॑वसाय॒याञ्च॑कार ॥6॥
(तै.ब्रा. 2.1.5.2.1)

वेदवारिधिः प. रामानुजाचार्यः

## प्रायोगिकसंशोधनम्, अनुसन्धानञ्च






# पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)

pivstrust.org 
: pivstrust@gmail.com

**प्रायोगिकसंशोधनम्, अनुसन्धानश्च**

# Programming the Taittirīya Prātiśākhya Pragraha rules - Solution Design




तैत्तिरीयप्रातिशाख्ये चतुर्थाध्याये प्रग्रहविषयः विवृतः । अस्य अध्यायस्य प्रमेयं सङ्गणकयन्त्रद्वारा विश्लेषणेन बहवः उपयुक्ता अंशाः ज्ञायन्ते इत्यत्र लेखे प्रतिपाद्यते । ईदृशसंशोधनानुसन्धानादि वैदिकानाम् उपयुक्तं भवति ।

सूत्रलक्षणपरीक्षादिकं च शक्यम् अनेन क्रमेण । यथा एकस्यैव पदस्य सूत्रद्वयेन प्रग्रहत्वसिद्धिः ।

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org ✉: pivstrust@gmail.com

# लक्षणान्तकक्ष्या - विषयसूची

## १. वेदपरिचयः

विभिन्नशाखानां मन्त्रविभागसंख्यादिकं [देवनागरी मातृका ऋग्वेदीया संख्याविवरणार्था]

स्वरादिवैशिष्ट्यम् - भूमिकादिभ्यः सङ्ग्राह्यम् । शृङ्खलापाठादि, विकृतिपाठ, वर्णक्रमादि अध्ययनक्रमविशेषाः - ऋषि-च्छन्दो-देवता-विनियोगाः

प्रतिपाद्यविषयाः - सूक्तसङ्ग्रहः, ऐतरेयब्राह्मणम्, अनुवाकार्थसङ्ग्रहः, काण्व,माध्यन्दिन,शतपथ-विषयानुक्रमणिका, सामविभागः, पैप्पलाद, शौनक विषयसूची

(सर्वेषां मिलित्वा एकत्र कोष्टकनिर्माणं शक्यम् वा)

वेदवारिधिः प. रामानुजाचार्यः